

संस्कृत भारती

अक्षरम्, ८ उपमार्गः, २ घट्टः गिरिनगरम्, बेङ्गलूरु - ५६० ०८५.

पत्रालयद्वारा संस्कृतम्

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

PRAVESHA -10

DO'S AND DON'TS

There is no use in glorifying Samskrit as 'great' or 'sweet' etc. It is actually in learning Samskrit that one's responsibility lies and not in glorification of Samskrit. So, we say, संस्कृतं वदतु, न तु संस्कृतविषये - Speak in Samskrit and not about Samskrit.

"Now, Samskrit has to be simplified and therefore remove dual number" say some. Simplification means, forming new rules in the place of the existing ones. But without applying any new rule simple Samskrit can be learnt and used. What is important is to encourage the speaker by appreciating his or her efforts to speak in Samskrit and not keep counting the flaws.

While using regional language we should employ Samskrit words instead of English or any foreign language. By this -

(i) We get liberated from foreign culture.

(ii) By the use of Samskrit words the feeling of provinciality is removed and a language form appears which can be understood by all.

(iii) Samskrit is learnt indirectly.

Therefore we can pay attention to greater use of Samskrit in our speech and writings.

We should instill a feeling that Samskrit learning enhances one's status. Therefore merited Samskrit students should be honoured in public functions. A feeling that speaking in Samskrit is a matter of pride, character of modern life and patriotism should be propagated.

Language and Culture are inter connected. When language grows culture expands. By cultural rejuvenation the rejuvenation of language happens. Therefore, if we look forward to rejuvenation it can happen by the cooperation of all in our efforts.

Languages in India are mutually complementary. By means of promotion of regional languages propagation of Samskrit becomes easy. Thus all the languages also get nourished. Samskrit movement is not directed against any language. We therefore pass through a path free from disputes. In the implementation of our work we should not appose English and engage ourselves in the propagation of Samskrit. When Samskrit develops English disappears on its own. Is it not better to light a lamp and prevent darkness than shouting against darkness ?

ॐ

॥ जयतु भारतम्-जयतु भारती ॥

Jayatu Bhāratam - Jayatu Bhāratī
Victory of Bhārata – Victory of Samskrita

SAMSKRITA BHARATI
संस्कृत भारती

पत्रालयद्वारा संस्कृतम्
Samskrit Through Correspondence

'Aksharam' 8th cross, Girinagar II Phase
Bangalore-560 085

PRAVEŚA (First Session)

दशमः पाठः - TENTH LESSON

॥ गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥

Merits alone are the ground of respect in the meritorious persons, neither their sex nor their age.

1. SENTENCES

Just to refresh your memory about the lessons already studied by you, mixed types of sentences are given below. Construct the sentences on their model and study them.

1. सः तत्र अस्ति । = He is there.
2. बालाः क्रीडाङ्गणे सन्ति । = Boys are on the play-ground.
3. अन्तः अहम् अस्मि । = I am inside.
4. वयम् अत्रैव स्मः । = We are here only.
5. तथा अस्तु । = Let it be so.
6. ते सन्तु नाम, को दोषः ? = Let them be, what is wrong?
7. सा तदा तत्र आसीत् । = She was there then.
8. अनुपङ्क्तौ बहु जनाः आसन् । = There were many people in the queue.
9. अहमपि तत्रैव आसम् । = I too was there only.
10. वयं बहिरेव आस्म । = We were only outside.
11. सः सम्यक् कार्यं करोति । = He works well.
12. ललनाः पाकं कुर्वन्ति । = Women cook.
13. अहं भाषणं करोमि । = I give a lecture.
14. तत् वयं कुर्मः । = That we do.
15. सः एव करोतु । = Let him only do.
16. तरुणाः इदं कार्यं कुर्वन्तु । = Let young men do this.

The different forms of 'अस्ति' and 'करोति' are used in the sentences.

Study the following sentences–

1. अयं न पठति । = This person does not study (read).
2. सः कार्यं न करोति । = He does not do the work.
3. सा अत्र न अस्ति । = She is not here.
4. अहं शालां न गच्छामि । = I do not go to school.
5. अहं न दृष्टवान् । = I did not see.

6. सः गच्छति वा ? = Is he going?
7. अहं करोमि वा ? = Can I do?
8. वयं पठाम वा ? = Shall we read?
9. ते तत्र तिष्ठन्ति वा ? = Are they standing there?
10. अयं गायति वा ? = Does this person (man or boy) sing?
11. कः गच्छति ? = Who goes?
12. का धावति ? = Who (feminine) runs?
13. के क्रीडन्ति ? = Who (masculine, plural) play?
14. इमानि कानि फलानि ? = Which fruits are these?
15. सः कः ? = Who is he?
16. तत् किम् ? = What is that?
17. भवान् भोजनं करोति वा ? = Do you take food?
18. भवान् कदा आगच्छति ? = When do you come?
19. भवानेव पृच्छतु = You only ask.
20. भवान् तत् स्मरति वा ? = Do you remember that?
21. भवान् तत्र नासीत् = You were not there.

1. अस्ति - करोति ।

Verbs in the earlier lesson were similar in their forms. Many verbs are not identical in forms. अस्ति; करोति are important among them.

The different forms of these are given below–

Present tense

अस्ति	स्तः	सन्ति	करोति	कुरुतः	कुर्वन्ति
असि	स्थः	स्थ	करोषि	कुरुथः	कुरुथ
अस्मि	स्वः	स्मः	करोमि	कुर्वः	कुर्मः

Past tense

आसीत्	आस्ताम्	आसन्	अकरोत्	अकुरुताम्	अकुर्वन्
आसीः	आस्तम्	आस्त	अकरोः	अकुरुतम्	अकुरुत
आसम्	आस्व	आस्म	अकरवम्	अकुर्व	अकुर्म

Imperative

अस्तु / स्तात्	स्ताम्	सन्तु	करोतु / कुरुतात्	कुरुताम्	कुर्वन्तु
एधि / स्तात्	स्तम्	स्त	कुरु / कुरुतात्	कुरुतम्	कुरुत
असानि	असाव	असाम	करवाणि	करवाव	करवाम

2. When 'न' is used before a verb, it gives a negative sense.

Example– सः हसति - He laughs.

सः न हसति - He does not laugh.

'न' need not be necessarily before the verb. But it is always construed with the verb.

Example– न अहं क्षीरं पिबामि - I do not drink milk.

सः न तत्र वसति - He does not live there.

3. With 'वा' at the end, the sentence generally becomes interrogative.

Example– सः यच्छति - He gives.

सः यच्छति वा ? - Will he give?

4. With any form of 'किम्' in whatever gender (कः, का, किम्) the sentences become interrogative.

5. The word 'भवान्' means 'your honour'. It is used in the sense of 'you' also. When 'भवान्' is used, the verb should be in the III person (प्रथम पुरुष). But not in the II person (मध्यमपुरुष).

Example– भवान् आगच्छति - You come.
भवान् पृच्छतु - You ask.

EXERCISE

A) Use the following in your own sentences.

Ex.– सङ्कल्पः - Determination
भगीरथः सङ्कल्पम् अकरोत् ।

Words expressing the meaning of certain properties-

धर्मः–Dharma	आनन्दः–Delight
शीतलः–Cold	ऊहः–A guess
संशयः–A doubt	सिद्धान्तः–A decision
भ्रमः–Misunderstanding	प्रसन्नः–Calm
परिमलः–Fragrance	गम्भीरः–Deep
कलुषः–Dirty	उत्तानः–Shallow
समूहः–Group	अपराधः–A blunder
प्रतीकारः–Revenge	पराजयः–Defeat
लाभः–Gain	नष्टम्–Loss

B) Convert the following into questions–

1. सः भाषते ।
2. ते स्पर्धन्ते ।
3. भवान् पिबति ।
4. ताः आगच्छन्ति ।

C) Use 'न' in following–

1. अम्बा पचति ।
2. सीता क्षीरं पिबति ।
3. रमा गायति ।
4. रामः पुस्तकं पठति ।

2. सन्धयः

यण्सन्धिः – When इ, उ, ऋ, ऌ, are immediately followed by any other vowels other than those, there is the substitution of य् for इ, व् for उ, र् for ऋ, and ल् and ऌ. This is called यण्सन्धि.

(because य्, व्, र्, ल्, are यण् Letters)

Example–

इति+अपि–इत्यपि	मातृ+अर्चनम्–मात्रर्चनम्
(इ+अ)–(य्+अ)	(ऋ+अ)–(र्+अ)
मधु+इदम्–मध्विदम्	ऌ+आकृतिः–लाकृतिः
(उ+इ)–(व्+इ)	(ऌ+आ)–(ल्+आ)

यान्तवान्तादेशसन्धिः – When ए, ओ, ऐ, औ are followed by any vowel, there is a substitution of अय् for ए, अव् for ओ, आय् for ऐ and आव् for औ. This is called यान्तवान्तादेशसन्धि ।

Example–

हरे+इह–हरयिह	विष्णो+इह–विष्णविह
(ए+इ)–(अय्+इ)	(ओ+इ)–(अव्+इ)
नै+अकः–नायकः	पौ+अकः–पावकः
(ऐ+अ)–(आय्+अ)	(औ+अ)–(आव्+अ)

3. RIDDLE प्रहेलिका

सानुजः काननं गत्वा यातुधानान् जघान कः ?
मध्ये वर्णत्रयं दत्त्वा रावणः कीदृशो वद ॥

Who killed the demons after going to the forest with his brother? Add three letters in the middle of that word and say what sort of person Rāvaṇa was?

(Answer in the last page)

4. COMPREHENSION
सङ्ग्राह्यविषयाः

1. दकारान्तः त्रिलिङ्गकः 'अस्मद्' शब्दः – (I)

प्र.	अहम्	आवाम्	वयम्
द्वि.	माम्-मा	आवाम्-नौ	अस्मान्-नः
तृ.	मया	आवाभ्याम्	अस्माभिः
च.	मह्यम्-मे	आवाभ्याम्-नौ	अस्मभ्यम्-नः
पं.	मत्	आवाभ्याम्	अस्मत्
ष.	मम-मे	आवयोः-नौ	अस्माकं-नः
स.	मयि	आवयोः	अस्मासु

2. दकारान्तः त्रिलिङ्गकः 'युष्मद्' शब्दः – (You)

प्र.	त्वम्	युवाम्	यूयम्
द्वि.	त्वाम्-त्वा	युवाम्-वाम्	युष्मान्-वः
तृ.	त्वया	युवाभ्याम्	युष्माभिः
च.	तुभ्यम्-ते	युवाभ्याम्-वाम्	युष्मभ्यम्-वः
पं.	त्वत्	युवाभ्याम्	युष्मत्
ष.	तव-ते	युवयोः-वाम्	युष्माकम्-वः
स.	त्वयि	युवयोः	युष्मासु

3. दकारान्तः पुंल्लिङ्गः 'तद्' शब्दः – (He)

प्र.	सः	तौ	ते
द्वि.	तम्	तौ	तान्
तृ.	तेन	ताभ्याम्	तैः
च.	तस्मै	ताभ्याम्	तेभ्यः
पं.	तस्मात्	ताभ्याम्	तेभ्यः
ष.	तस्य	तयोः	तेषाम्
स.	तस्मिन्	तयोः	तेषु

4. दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः – (She)

प्र.	सा	ते	ताः
द्वि.	ताम्	ते	ताः
तृ.	तया	ताभ्याम्	ताभिः
च.	तस्यै	ताभ्याम्	ताभ्यः
पं.	तस्याः	ताभ्याम्	ताभ्यः
ष.	तस्याः	तयोः	तासाम्
स.	तस्याम्	तयोः	तासु

5. दकारान्तः नपुंसकलिङ्गः 'तद्' शब्दः – (That)

प्र.	तत्	ते	तानि
द्वि.	तत्	ते	तानि

The remaining is as पुंल्लिङ्गः 'तद्'शब्दः ।

6. मकारान्तः पुंल्लिङ्गः 'इदम्' शब्दः – (This person, Masculine)

प्र.	अयम्	इमौ	इमे
द्वि.	इमम्-एनम्	इमौ-एनौ	इमान्-एनान्
तृ.	अनेन-एनेन	आभ्याम्	एभिः
च.	अस्मै	आभ्याम्	एभ्यः
पं.	अस्मात्	आभ्याम्	एभ्यः
ष.	अस्य	अनयोः-एनयोः	एषाम्
स.	अस्मिन्	अनयोः-एनयोः	एषु

7. मकारान्तः स्त्रीलिङ्गः 'इदम्' शब्दः – (This person, Feminine)

प्र.	इयम्	इमे	इमाः
द्वि.	इमाम्-एनाम्	इमे-एने	इमाः-एनाः
तृ.	अनया-एनया	आभ्याम्	आभिः
च.	अस्यै	आभ्याम्	आभ्यः
पं.	अस्याः	आभ्याम्	आभ्यः
ष.	अस्याः	अनयोः-एनयोः	आसाम्
स.	अस्याम्	अनयोः-एनयोः	आसु

8. मकारान्तः नपुंसकलिङ्गः 'इदम्' शब्दः – (This)

प्र.	इदम्	इमे	इमानि
द्वि.	इदम्	इमे	इमानि

The remaining is as पुंल्लिङ्ग 'इदम्' शब्दः ।

9. अकारान्तपुंल्लिङ्गः 'सर्वशब्दः'

सर्वः	सर्वौ	सर्वे
सर्वम्	सर्वौ	सर्वान्
सर्वेण	सर्वाभ्याम्	सर्वैः
सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
सर्वस्य	सर्वयोः	सर्वेषाम्
सर्वस्मिन्	सर्वयोः	सर्वेषु
हे सर्व	हे सर्वौ	हे सर्वे

10. आकारान्तस्त्रीलिङ्गः सर्वाशब्दः

सर्वा	सर्वे	सर्वाः
सर्वाम्	सर्वे	सर्वाः
सर्वया	सर्वाभ्याम्	सर्वाभिः
सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
सर्वस्याः	सर्वयोः	सर्वासाम्
सर्वस्याम्	सर्वयोः	सर्वासु
हे सर्वे	हे सर्वे	हे सर्वाः

5. INTRODUCTION TO SAMSKRITA LITERATURE

संस्कृतवाङ्मयपरिचयः

वेणीसंहारम्

The author of the drama is Bhaṭṭa Nārāyaṇa.

The drama is based on the story from Mahābhārata. Story starts from Kṛṣṇa's efforts for peace on behalf of the Pāṇḍavas and ends with the killing of Duryodhana and the tying of Draupadi's braid of hair. 'Veṇī' means braid of hair and "Samhāra" means tying.

The theme of the drama is this: Śri Kṛṣṇa goes to the Kauravas for peace. The peace efforts were not to Bhīma's liking. The peace efforts broke down. War was inevitable. Bhīma was delighted. The war started. Droṇa died in the war. The anger of Aśvatthāman, the son of Droṇa, was doubled on account of this. Meanwhile due to a quarrel between Aśvatthāman and Karṇa, Aśvattāman relinquished his arms. (i.e. declined to fight) Thereafter Duśśāsana and Karṇa die in the battle. Duryodhana enters the lake. Then he was roused to come out by the irritating words of Bhīma and made to fight. Then Bhaīma killed him in the fight. Then Bhīma shaped the hair of Draupadi into a braid. Dharmarāja was coronated.

The dramatist has dramatised in six acts, the lengthy story of the Mahābhārata from the Udyoga-parvan to the Shalyaparvan maintaining its interest throughout. The drama exactly conforms to the rules of dramaturgy in Samskrit. The technical Sandhi-Sandhyanga arrangement is very well evident in the drama.

मृच्छकटिकम्

The author of the drama is Śūdraka.

The theme of the drama pertains to the love of Cārudatta and Vasantasena. Since an episode of clay cart (मृत् - clay शकटिका - toy cart) comes here, the drama is named after it.

Cārudatta, who was once a rich man, is now a poor man. He is a man of noble qualities. He is deeply in love with a courtesan called Vasantasena. One day, Vasantasena deposits her ornaments with Cārudatta. Then ornaments are stolen by a thief. Cārudatta sends in return the pearl necklace of his wife with the report that he lost the deposited ornaments in the game of dice. But mean while, the stolen ornaments came into the hands of Vasantasena through her maid servant called Madanikā. When Vasantasena comes to Cārudatta to return the ornaments saying that she lost the pearl necklace in the game of dice, Cārudatta's son was weeping with a demand for a golden cart to play. He has only a clay cart to play with. Vasantasena puts her ornaments into the clay cart. Leaving a message to Vasantasena that she should come in a cart, Cārudatta has left for the garden. Due to exchange of carts, Vasantasena falls into the hands of the wicked Śakāra, a brother-in-law of the king. Śakāra strangles her and thinking that she is dead, Śakāra files a case against Chārudatta and forces the judge to subject Cārudatta to death sentence on the charge of Vasantasena's murder. Vasantasena is revived back to life by a budhist monk. She runs to the place of execution. The wickedness of Śakāra is exposed. Chārudatta is released from the gallows and is happily married to Vasantasena.

The Dramatist has very nicely depicted the life of the ordinary men in the ancient society in this drama.

The language used in this drama is very much akin to the spoken language.

6. कथा

वैराग्येण एव तृप्तिः

चन्द्रगुप्तः मगधदेशस्य नृपः । तस्य मन्त्री चाणक्यः । सः तपोधनः, राजतन्त्रज्ञश्च आसीत् । मन्त्री सन् अपि सः एकस्मिन् उटजे वसति स्म । वैराग्यभावनया सः पूर्णः आसीत् । एकदा नृपेण चाणक्याय कम्बलाः समर्पिताः । 'एतान् कम्बलान् दरिद्रेभ्यः ददातु' इति नृपः सूचितवान् ।

चाणक्यस्य उटजं नगरात् बहिः आसीत् । केचन चोराः कम्बलान् अपहर्तुं चिन्तितवन्तः । ते एकदा रात्रौ चाणक्यस्य उटजं प्राविशन् । मध्यरात्रसमयः । शीतकालः । अतीव शैत्यम् आसीत् । तथापि चाणक्यः कटे सुप्तः आसीत् । तस्य पत्नी अपि कटे एव सुप्ता आसीत् । पार्श्वे कम्बलानां राशिः एव आसीत् । चोराणाम् आश्चर्यम् । पार्श्वे कम्बलानां राशिरेवास्ति । चाणक्यः कम्बलं विना निद्रां करोति ! चोराः चौर्यं न अकुर्वन् । ते चाणक्यं प्रबोधितवन्तः । चोराः– "चाणक्य ! पार्श्वे कम्बलानां राशिरेवास्ति । तथाऽपि त्वं किमर्थं भूमौ शयनं करोषि ?" इत्यपृच्छन् । चाणक्यः उक्तवान्– "कम्बलाः नृपेण दत्ताः । ते दरिद्रेभ्यः दातव्याः । श्वः प्रभाते वितरणं करिष्यामि । तेषाम् उपयोगं कर्तुं मम न अधिकारः । किञ्च अहं विरक्तः । सदा तृप्तः" इति ।

इदं श्रुत्वा, चोराणां लज्जा उत्पन्ना । 'अन्येषां द्रव्यस्य उपयोगेन अधर्मः भवति इति चाणक्यस्य विचारः अस्ति । वयं जीवने प्रतिदिनम् अन्यस्य द्रव्यमेव अपहरामः, अधर्मं कुर्मः । पापस्य

सङ्ग्रहश्च भवति' इति चिन्तयित्वा ते चाणक्यस्य क्षमां प्रार्थितवन्तः । ततः सज्जनाश्च अभवन् ।

Renunciation is the way to contentment

Candragupta was a king of Magadha kingdom. He had Cāṇakya as his minister. Cāṇakya was an ascetic well versed in the science of polity. Although he was a minister, he lived in a hut. He had renounced all pleasures. Once the king sent him blankets indicating that they should be distributed among the poor.

Cāṇakya's hut was on the outskirts of the city. Some thieves thought of stealing the blankets. One night they entered that hut of Cāṇakya. It was midnight. The season was winter. There was severe chilliness. Yet Cāṇakya was sleeping on a mat. His wife was also sleeping on a mat. There was a heap of blankets on their side. The thieves were struck with wonder. There is a heap of blankets by his side. Cāṇakya sleeps without blankets.! The thieves did not steal. They woke up Cāṇakya and asked– "O! Cāṇakya! There is a heap of blankets by your side. Yet why are you sleeping on the ground?" Cāṇakya said– "blankets are sent by the king. They are to be distributed among the poor. Tomorrow morning I shall distribute them. I have no authority to use them. Moreover I have renounced all pleasures. Always I am contented with what I have."

On hearing this, the thieves felt ashamed. "Using other's wealth is unlawful – This is the idea of

Cāṇakya. We are everyday engaged in stealing the wealth of others. We are breaking the law. We have accumulated sin'' – so saying they begged forgiveness from Cāṇakya. Thereafter they became good men.

7. SUBHĀṢITAM सुभाषितम् ।

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥

A Yogin says to a king: ''We are here (i.e. in the hermitage) contented with garment, made of barks, while you are with your silken garments. Our contentment is the same. There is no difference whatever. He who has abundant desire, is poor. When there is contentment in the mind, who is rich and who is poor?

8. SAMSKRIT SENTENCES OF DAILY USE

My health is not good.	मम आरोग्यं सम्यक् नास्ति ।
What has happened?	किम् अभवत् ?
I have light temperature.	किञ्चित् ज्वरः अस्ति ।
Severe headache.	महती शिरोवेदना ।

Stomach ache-उदरवेदना	Vomit-वमनम्
Indigestion-अजीर्णम्	Wound-व्रणः
Cold-पीनसः	Cough-कासः

Since when?	कदा आरभ्य ?
Since the morning.	अद्य प्रातःकालतः ।
Do you feel cold?	शैत्यम् अस्ति वा ?
Have you taken medicine?	औषधं स्वीकृतवान् वा ?

Tablet-गुलिका	Injection-सूच्यौषधम्
Powder-चूर्णम्	Mixture-कषायः

See a doctor.	वैद्यं पश्यतु ।
Smear ointment.	लेप्यं लेपयतु ।

❑ ❑ ❑

एकवचनम्

पु.	बालकः/सः/एषः/कः/भवान्	गच्छति	वर्तमान -
स्त्री.	बालिका/सा/एषा/का/भवती	गमिष्यति	भविष्यत् -
नपुं.	वाहनम्/तत्/एतत्/किम्	गच्छतु	प्रेरणार्थक -

बहुवचनम्

पु.	बालकाः/ते/एते/के/भवन्तः	गच्छन्ति	वर्तमान -
स्त्री.	बालिकाः/ताः/एताः/काः/भवत्यः	गमिष्यन्ति	भविष्यत् -
नपुं.	वाहनानि/तानि/एतानि/कानि	गच्छन्तु	प्रेरणार्थक -

(continued in next page)

(continued from Page 16)

एकवचनम्

अहम्	→	गच्छामि	वर्तमान -
		गमिष्यामि	भविष्यत् -

एकवचनम्

त्वम्	→	गच्छसि	वर्तमान -
		गमिष्यसि	भविष्यत् -

बहुवचनम्

वयम्-	→	गच्छामः	वर्तमान -
		गमिष्यामः	भविष्यत् -

सूचना -'त्वम्' इत्यस्य स्थाने 'भवान्/भवती' इति शब्दस्य प्रयोगः सुलभः उचितश्च ।

तथैव 'यूयम्' इत्यस्य स्थाने 'भवन्तः/भवत्यः' इति ।

एकवचनम्

पु.	बालकः/सः/एषः/कः/भवान्/अहम्/(त्वम्)	→	गतवान्	भूत -
स्त्री.	बालिका/सा/एषा/का/भवती/अहम्/(त्वम्)	→	गतवती	भूत -
नपुं.	वाहनम्/तत्/एतत्/किम्	→	गतम्	भूत -

बहुवचनम्

पु.	बालकाः/ते/एते/के/भवन्तः/वयम्	→	गतवन्तः	भूत -
स्त्री.	बालिकाः/ताः/एताः/काः/भवत्यः/वयम्	→	गतवत्यः	भूत -
नपुं.	वाहनानि/तानि/एतानि/कानि	→	गतानि	भूत -

अभ्यासः - उपरितन-कोष्टकस्य साहाय्येन १३० वाक्यानि रचयन्तु ।

क्रियापदकोष्टकम्

All the verbs used in प्रवेश lessons are given below.

Root and its meaning	Present लट् प्र.पु[1].ए.व.[2]	Future लृट् प्र.पु.ए.व.	Past लङ् प्र.पु.ए.व.	Imperative लोट् प्र.पु.ए.व.
अट् - Roam	अटति	अटिष्यति	आटत्	अटतु
अस् - Become	अस्ति	भविष्यति	आसीत्	अस्तु
इष् (इच्छ्)- Desire	इच्छति	एषिष्यति	ऐच्छत्	इच्छतु
कथ् - Tell	कथयति	कथयिष्यति	अकथयत्	कथयतु
वि + कस्-Blossom	विकसति	विकसिष्यति	व्यकसत्	विकसतु
कृ (कर्) - Do	करोति	करिष्यति	अकरोत्	करोतु
कृत (कर्त्)- Cut	कर्तयति	कर्तयिष्यति	अकर्तयत्	कर्तयतु
क्री - Buy	क्रीणाति	क्रेष्यति	अक्रीणात्	क्रीणातु
क्रीड् - Play	क्रीडति	क्रीडिष्यति	अक्रीडत्	क्रीडतु
क्षाल् - Cleanse	क्षालयति	क्षालयिष्यति	अक्षालयत्	क्षालयतु
खाद् - Eat	खादति	खादिष्यति	अखादत्	खादतु
गम् (गच्छ्)- Go	गच्छति	गमिष्यति	अगच्छत्	गच्छतु
आ + गम् - Come	आगच्छति	आगमिष्यति	आगच्छत्	आगच्छतु
उद् + गम् - Getup	उद्गच्छति	उद्गमिष्यति	उदगच्छत्	उद्गच्छतु

1. प्र.पु.-प्रथमपुरुषः Third Person, 2. ए.व.-एकवचनम् Singular

	कर्मणि ए.व.	क्त पुं[3].प्रथमा.ए.व.	क्तवतु पुं.प्रथमा.ए.व.	पूर्वकालवाचकम् अव्ययम् (क्त्वा/ल्यप्)	हेत्वर्थकम् अव्ययम् (तुमुन्)
	अट्यते	अटितः	अटितवान्	अटित्वा	अटितुम्
	भूयते	(आसीत्)	——	(भूत्वा)	(भवितुम्)
	इष्यते	इष्टः	इष्टवान्	इष्ट्वा	एष्टुम्
	कथ्यते	कथितः	कथितवान्	कथयित्वा	कथयितुम्
	विकस्यते	विकसितः	विकसितवान्	विकस्य	विकसितुम्
	क्रियते	कृतः	कृतवान्	कृत्वा	कर्तुम्
	कर्त्यते	कर्तितः	कर्तितवान्	कर्तयित्वा	कर्तयितुम्
	क्रीयते	क्रीतः	क्रीतवान्	क्रीत्वा	क्रेतुम्
	क्रीड्यते	क्रीडितः	क्रीडितवान्	क्रीडित्वा	क्रीडितुम्
	क्षाल्यते	क्षालितः	क्षालितवान्	क्षालयित्वा	क्षालयितुम्
	खाद्यते	खादितः	खादितवान्	खादित्वा	खादितुम्
	गम्यते	गतः	गतवान्	गत्वा	गन्तुम्
	आगम्यते	आगतः	आगतवान्	आगम्य/आगत्य	आगन्तुम्
	उद्गम्यते	उद्गतः	उद्गतवान्	उद्गम्य/त्य	उद्गन्तुम्

3. पुं-पुंल्लिङ्गः Masculine

Root and its meaning	लट्	लृट्	लङ्	लोट्
गर्ज् - Roar	गर्जति	गर्जिष्यति	अगर्जत्	गर्जतु
गिल् - Swallow	गिलति	गलिष्यति	अगिलत्	गिलतु
गै (गाय्)- Sing	गायति	गास्यति	अगायत्	गायतु
उद् + घट् - Open	उद्घाटयति	उद्घाटयिष्यति	उदघाटयत्	उद्घाटयतु
घ्रा (जिघ्र)- Smell	जिघ्रति	घ्रास्यति	अजिघ्रत्	जिघ्रतु
चर् - Move	चरति	चरिष्यति	अचरत्	चरतु
चल् - Move	चलति	चलिष्यति	अचलत्	चलतु
चिन्त् - Think	चिन्तयति	चिन्तयिष्यति	अचिन्तयत्	चिन्तयतु
जी - Win	जयति	जेष्यति	अजयत्	जयतु
जीव् - Live	जीवति	जीविष्यति	अजीवत्	जीवतु
तक्ष् - Carpentry	तक्षति	तक्षिष्यति	अतक्षत्	तक्षतु
तड् - Beat	ताडयति	ताडयिष्यति	अताडयत्	ताडयतु
त्यज् - Abandon	त्यजति	त्यक्ष्यति	अत्यजत्	त्यजतु
दा - Give	ददाति	दास्यति	अददात्	ददातु
दा (यच्छ्)- Give	यच्छति	-''-	अयच्छत्	यच्छतु
दूष् - Abuse	दूषयति	दूषयिष्यति	अदूषयत्	दूषयतु
दृश (पश्य्) - See	पश्यति	द्रक्ष्यति	अपश्यत्	पश्यतु
धाव् - Run	धावति	धाविष्यति	अधावत्	धावतु
धृ (धर्)-Wear	धरति	धरिष्यति	अधरत्	धरतु
धृ (धार्)- Wear	धारयति	धारयिष्यति	अधारयत्	धारयतु

कर्मणि	क्त	क्तवतु	क्त्वा/ल्यप्	तुमुन्
गर्ज्यते	गर्जितः	गर्जितवान्	गर्जित्वा	गर्जितुम्
गीर्यते	गीर्णः	गीर्णवान्	गीर्त्वा	गरितुम्
गीयते	गीतः	गीतवान्	गीत्वा	गातुम्
उद्घाट्यते	उद्घाटितः	उद्घाटितवान्	उद्घाट्य	उद्घाटयितुम्
घ्रायते	घ्रातः	घ्रातवान्	घ्रात्वा	घ्रातुम्
चर्यते	चरितः	चरितवान्	चरित्वा	चरितुम्
चल्यते	चलितः	चलितवान्	चलित्वा	चलितुम्
चिन्त्यते	चिन्तितः	चिन्तितवान्	चिन्तयित्वा	चिन्तयितुम्
जीयते	जितः	जितवान्	जित्वा	जेतुम्
जीव्यते	जीवितः	जीवितवान्	जीवित्वा	जीवितुम्
तक्ष्यते	तक्षितः	तक्षितवान्	तक्षित्वा	तक्षितुम्
ताड्यते	ताडितः	ताडितवान्	ताडयित्वा	ताडयितुम्
त्यज्यते	त्यक्तः	त्यक्तवान्	त्यक्त्वा	त्यक्तुम्
दीयते	दत्तः	दत्तवान्	दत्त्वा	दातुम्
,,	,,	,,	,,	,,
दूष्यते	दूषितः	दूषितवान्	दूषयित्वा	दूषयितुम्
दृश्यते	दृष्टः	दृष्टवान्	दृष्ट्वा	द्रष्टुम्
धाव्यते	धावितः	धावितवान्	धावित्वा	धावितुम्
ध्रियते	धृतः	धृतवान्	धृत्वा	धर्तुम्
धार्यते	धारितः	धारितवान्	धारयित्वा	धारयितुम्

Root and its meaning	लट्	लृट्	लङ्	लोट्
ध्यै (ध्याय्) - Meditate	ध्यायति	ध्यास्यति	अध्यायत्	ध्यायतु
नम् - Salute	नमति	नंस्यति	अनमत्	नमतु
निन्द् - Abuse	निन्दति	निन्दिष्यति	अनिन्दत्	निन्दतु
नी - Lead, Carry	नयति	नेष्यति	अनयत्	नयतु
आ + नी- Bring	आनयति	आनेष्यति	आनयत्	आनयतु
नृत् - Dance	नृत्यति	नर्तिष्यति	अनृत्यत्	नृत्यतु
पच् - Cook	पचति	पक्ष्यति	अपचत्	पचतु
पठ् - Read	पठति	पठिष्यति	अपठत्	पठतु
पत् - Fall	पतति	पतिष्यति	अपतत्	पततु
उत् + पत् - Jump	उत्पतति	उत्पतिष्यति	उदपतत्	उत्पततु
पा (पिब्) - Drink	पिबति	पास्यति	अपिबत्	पिबतु
पूर - Fill	पूरयति	पूरयिष्यति	अपूरयत्	पूरयतु
प्रच्छ् (पृच्छ्) - Question	पृच्छति	प्रक्ष्यति	अपृच्छत्	पृच्छतु
फल् - Fruit	फलति	फलिष्यति	अफलत्	फलतु
भू (भव्) - To be	भवति	भविष्यति	अभवत्	भवतु
अनु + भू - To experience	अनुभवति	अनुभविष्यति	अन्वभवत्	अनुभवतु
भ्रम् - Roam	भ्रमति	भ्रमिष्यति	अभ्रमत्	भ्रमतु
मिल् - Meet	मिलति	मेलिष्यति	अमिलत्	मिलतु
मृ (मारय्) - Beat/Kill	मारयति	मारयिष्यति	अमारयत्	मारयतु

	कर्मणि	क्त	क्तवतु	क्त्वा/ल्यप्	तुमुन्
	ध्यायते	ध्यातः	ध्यातवान्	ध्यात्वा	ध्यातुम्
	नम्यते	नतः	नतवान्	नत्वा	नन्तुम्
	निन्द्यते	निन्दितः	निन्दितवान्	निन्दित्वा	निन्दितुम्
	नीयते	नीतः	नीतवान्	नीत्वा	नेतुम्
	आनीयते	आनीतः	आनीतवान्	आनीय	आनेतुम्
	नृत्यते	नृत्तः	नृत्तवान्	नर्तित्वा	नर्तितुम्
	पच्यते	पक्वः	पक्वान्	पक्त्वा	पक्तुम्
	पठ्यते	पठितः	पठितवान्	पठित्वा	पठितुम्
	पत्यते	पतितः	पतितवान्	पतित्वा	पतितुम्
	उत्पत्यते	उत्पतितः	उत्पतितवान्	उत्पत्य	उत्पतितुम्
	पीयते	पीतः	पीतवान्	पीत्वा	पातुम्
	पूर्यते	पूरितः	पूरितवान्	पूरयित्वा	पूरयितुम्
	पृच्छ्यते	पृष्टः	पृष्टवान्	पृष्ट्वा	प्रष्टुम्
	फल्यते	फलितः	फलितवान्	फलित्वा	फलितुम्
	भूयते	भूतः	भूतवान्	भूत्वा	भवितुम्
	अनुभूयते	अनुभूतः	अनुभूतवान्	अनुभूय	अनुभवितुम्
	भ्रम्यते	भ्रान्तः	भ्रान्तवान्	भ्रमित्वा	भ्रमितुम्
	मिल्यते	मिलितः	मिलितवान्	मिलित्वा	मेलितुम्
	मार्यते	मारितः	मारितवान्	मारयित्वा	मारयितुम्

Root and its meaning	लट्	लृट्	लङ्	लोट्	
या - Go	याति	यास्यति	अयात्	यातु	
रच् - Construct	रचयति	रचयिष्यति	अरचयत्	रचयतु	
लिख् - Write	लिखति	लेखिष्यति	अलिखत्	लिखतु	
वस् - Stay	वसति	वत्स्यति	अवसत्	वसतु	
वह् - Carry	वहति	वक्ष्यति	अवहत्	वहतु	
उप + विश - Sit	उपविशति	उपवेक्ष्यति	उपाविशत्	उपविशतु	
परि + विष् -Serve	परिवेषयति	परिवेषयिष्यति	पर्यवेषयत्	परिवेषयतु	
शक् - Can	शक्नोति	शक्ष्यति	अशक्नोत्	शक्नोतु	
श्रु - Hear	शृणोति	श्रोष्यति	अशृणोत्	शृणोतु	
सिध् - Achieve	सिध्यति	सेत्स्यति	असिध्यत्	सिध्यतु	
सीव् - Stitch	सीव्यति	सीविष्यति	असीव्यत्	सीव्यतु	
सूच् - Inform	सूचयति	सूचयिष्यति	असूचयत्	सूचयतु	
स्था - Stand	तिष्ठति	स्थास्यति	अतिष्ठत्	तिष्ठतु	
उत् + स्था -Getup	उत्तिष्ठति	उत्थास्यति	उदतिष्ठत्	उत्तिष्ठतु	
स्फुर्-Evident/Manifest	स्फुरति	स्फुरिष्यति	अस्फुरत्	स्फुरतु	
स्मृ - Remember	स्मरति	स्मरिष्यति	अस्मरत्	स्मरतु	
स्रव् - Flow	स्रवति	स्रविष्यति	अस्रवत्	स्रवतु	
हस् - Laugh	हसति	हसिष्यति	अहसत्	हसतु	
हृ - Snatch	हरति	हरिष्यति	अहरत्	हरतु	
प्र + हृ - Beat	प्रहरति	प्रहरिष्यति	प्राहरत्	प्रहरतु	
आ + ह्वे - Call	आह्वयति	आह्वास्यति	आह्वयत्	आह्वयतु	

कर्मणि	क्त	क्तवतु	क्त्वा/ल्यप्	तुमुन्
यायते	यातः	यातवान्	यात्वा	यातुम्
रच्यते	रचितः	रचितवान्	रचयित्वा	रचयितुम्
लिख्यते	लिखितः	लिखितवान्	लिखित्वा	लेखितुम्
उष्यते	उषितः	उषितवान्	उषित्वा	वस्तुम्
उह्यते	ऊढः	ऊढवान्	ऊढ्वा	वोढुम्
उपविश्यते	उपविष्टः	उपविष्टवान्	उपविश्य	उपवेष्टुम्
परिवेष्यते	परिवेषितः	परिवेषितवान्	परिवेष्य	परिवेषयितुम्
शक्यते	शक्तः	शक्तवान्	शक्त्वा	शक्तुम्
श्रूयते	श्रुतः	श्रुतवान्	श्रुत्वा	श्रोतुम्
सिद्ध्यते	सिद्धः	सिद्धवान्	सेधित्वा	सेद्धुम्
सीव्यते	सीवितः	सीवितवान्	सीवित्वा	सीवितुम्
सूच्यते	सूचितः	सूचितवान्	सूचयित्वा	सूचयितुम्
स्थीयते	स्थितः	स्थितवान्	स्थित्वा	स्थातुम्
उत्थीयते	उत्थितः	उत्थितवान्	उत्थाय	उत्थातुम्
स्फुर्यते	स्फुरितः	स्फुरितवान्	स्फुरित्वा	स्फुरितुम्
स्मर्यते	स्मृतः	स्मृतवान्	स्मृत्वा	स्मर्तुम्
स्रूयते	स्रुतः	स्रुतवान्	स्रुत्वा	स्रोतुम्
हस्यते	हसितः	हसितवान्	हसित्वा	हसितुम्
ह्रियते	हृतः	हृतवान्	हृत्वा	हर्तुम्
प्रह्रियते	प्रहृतः	प्रहृतवान्	प्रहृत्य	प्रहर्तुम्
आहूयते	आहूतः	आहूतवान्	आहूय	आह्वातुम्

आत्मनेपदिक्रियापदानि

Root and its meaning	लट्	लृट्	लङ्	लोट्
ईक्ष् - See	ईक्षते	ईक्षिष्यते	ऐक्षत	ईक्षताम्
ऊह् - Guess	ऊहते	ऊहिष्यते	औहत	ऊहताम्
कम्प् - Tremble	कम्पते	कम्पिष्यते	अकम्पत	कम्पताम्
क्षम् - Forgive	क्षमते	क्षमिष्यते	अक्षमत	क्षमताम्
डी - Fly	डयते	डयिष्यते	अडयत	डयताम्
त्रै (त्राय्) - Protect	त्रायते	त्रास्यते	अत्रायत	त्रायताम्
त्वर् - Hasten	त्वरते	त्वरिष्यते	अत्वरत	त्वरताम्
बाध् - Obstruct	बाधते	बाधिष्यते	अबाधत	बाधताम्
भाष् - Speak	भाषते	भाषिष्यते	अभाषत	भाषताम्
मुद् - Happy	मोदते	मोदिष्यते	अमोदत	मोदताम्
यत् - Try	यतते	यतिष्यते	अयतत	यतताम्
याच् - Beg	याचते	याचिष्यते	अयाचत	याचताम्
रुच् - Like	रोचते	रोचिष्यते	अरोचत	रोचताम्
लभ् - Obtain	लभते	लप्स्यते	अलभत	लभताम्
आ + लोक् - See	आलोकते	आलोकिष्यते	आलोकत	आलोकताम्
वन्द् - Salute	वन्दते	वन्दिष्यते	अवन्दत	वन्दताम्
वृत् (वर्त्) - Be	वर्तते	वर्तिष्यते	अवर्तत	वर्तताम्
वेप् - Tremble	वेपते	वेपिष्यते	अवेपत	वेपताम्
शङ्क - Doubt	शङ्कते	शङ्किष्यते	अशङ्कत	शङ्कताम्
श्लाघ् - Praise	श्लाघते	श्लाघिष्यते	अश्लाघत	श्लाघताम्
सह् - Bear	सहते	सहिष्यते	असहत	सहताम्
सेव् - Serve	सेवते	सेविष्यते	असेवत	सेवताम्
स्पर्ध् - Compete	स्पर्धते	स्पर्धिष्यते	अस्पर्धत	स्पर्धताम्

कर्मणि	क्त	क्तवतु	क्त्वा/ल्यप्	तुमुन्
ईक्ष्यते	ईक्षितः	ईक्षितवान्	ईक्षित्वा	ईक्षितुम्
ऊह्यते	ऊहितः	ऊहितवान्	ऊहित्वा	ऊहितुम्
कम्प्यते	कम्पितः	कम्पितवान्	कम्पित्वा	कम्पितुम्
क्षम्यते	क्षान्तः	क्षान्तवान्	क्षमित्वा	क्षमितुम्
डीयते	डयितः	डयितवान्	डयित्वा	डयितुम्
त्राय्यते	त्रातः	त्रातवान्	त्रात्वा	त्रातुम्
त्वर्यते	त्वरितः	त्वरितवान्	त्वरित्वा	त्वरितुम्
बाध्यते	बाधितः	बाधितवान्	बाधित्वा	बाधितुम्
भाष्यते	भाषितः	भाषितवान्	भाषित्वा	भाषितुम्
मोद्यते	मुदितः	मुदितवान्	मुदित्वा	मोदितुम्
यत्यते	यत्तः	यत्तवान्	यतित्वा	यतितुम्
याच्यते	याचितः	याचितवान्	याचित्वा	याचितुम्
रुच्यते	रुचितः	रुचितवान्	रोचित्वा	रोचितुम्
लभ्यते	लब्धः	लब्धवान्	लब्ध्वा	लब्धुम्
आलोक्यते	आलोकितः	आलोकितवान्	आलोक्य	आलोकितुम्
वन्द्यते	वन्दितः	वन्दितवान्	वन्दित्वा	वन्दितुम्
वर्त्यते	वर्तितः	वर्तितवान्	वर्तित्वा	वर्तितुम्
वेप्यते	वेपितः	वेपितवान्	वेपित्वा	वेपितुम्
शङ्क्यते	शङ्कितः	शङ्कितवान्	शङ्कित्वा	शङ्कितुम्
श्लाघ्यते	श्लाघितः	श्लाघितवान्	श्लाघित्वा	श्लाघितुम्
सह्यते	सोढः	सोढवान्	सोढ्वा	सोढुम्
सेव्यते	सेवितः	सेवितवान्	सेवित्वा	सेवितुम्
स्पर्ध्यते	स्पर्धितः	स्पर्धितवान्	स्पर्धित्वा	स्पर्धितुम्

उपरितनकोष्टकस्य साहाय्येन २५,००० वाक्यानि रचयन्तु ।

Suggestion:

Readers may know more about these sentences in the book titled "संस्कृतव्यवहारसाहस्री" (A collection of 1000 English - Samskrit sentences of daily use.)

Readers may make use of 1) "Kannada Samskrita Kośa" for Samskrit words of everyday use and their gender. 2) "Kannada Samskrita Kriyāpada Kośa" for verbs and its various forms.

For other such books and price list, Please write to us.

(Answer to the Riddle)

रामः - letters to be conjoined 'क्षसोत्त'–राक्षसोत्तमः

❑ ❑ ❑

INDIA'S CONTRIBUTION TO THE WORLD OF SCIENCE

(Continued from previous lesson)

SOUND -

There are some points about sound given by our ancestors which resemble modern principles although they are incomplete. Sabarasvami points out that sound travels through air, Udyotakara and other sages consider ether as its medium. Our ancestors knew also about sound waves.

Vijnana Bhikshu has analysed echo and some points which he has stated are close to modern science. Vatsyayana, Udyotakara, Vachaspati etc., have also analysed elaborately on sound and svaras.

MAGNETISM -

Sankaramishra has propounded fundamental principles of magnetism. He tells about why a metal pin is attracted towards magnet.

Bhoja (1050 AD) had ordered that the ships should not have metals below. Prof R.K. Mukerjee writes- 'Bhoja thought that the magnetic part that exists in the rocks of the sea may make the ships drawn towards them and lead to disaster'. He writes- 'The Hindus used to go on sea voyage in order to establish colonies in Java. Then they were using compass and know the directions. They called it matsyayantra'.

ELECTRICITY -

Umasvati appears to have known electricity. In his atomic theory he says that when two atoms combine they must have opposite qualities. He propounds that two atoms of same quality retard and those of opposite qualities attract.

Note:

The matters given in the inner pages of the cover are only for information. Questions on these points will not be asked in the exam.

PRINTED BOOK

(clause 128 of p.o. Guide, part-1)

सविधे,

संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम् संस्कृतम्

CONVENER

SAMSKRIT THROUGH CORRESPONDENCE

"AKSHARAM", 8TH CROSS, II PHASE
GIRINAGARA, BANGALORE-560 085
PHONE: 6721052